International Journal of Applied Research 2021; 7(8): 131-133




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 8.4
IJAR 2021; 7(8): 131-133
www.allresearchjournal.com
Received: 07-06-2021
Accepted: 11-07-2021

**संजीत कुमार झा**
नरौचधाम, भाया–रतनपुर
जिला–दरभंगा, बिहार, भारत

**Corresponding Author:**
**संजीत कुमार झा**
नरौचधाम, भाया–रतनपुर
जिला–दरभंगा, बिहार, भारत

# हिन्दूशास्त्रे ज्योतिशास्त्रस्योत्पत्तिः

## संजीत कुमार झा

### प्रस्तावना

संस्कृतवाङ्मयान्तरस्येव ज्योतिशास्त्रस्योत्पत्तिरपि ब्रह्मण एवाभूदिति सर्वथा विश्वस्यते। ब्रह्मा हि पितामहोऽस्य ज्गतः यज्ञसाधननिमित्तं चतुर्भ्यो मुखेभ्यश्चतुर एव वेदान् प्रावोचत् तेन हि वेदानां यज्ञात्मकत्वम्। ते च यज्ञाः कालाश्रयेणैव सिद्धयन्ति इति तत्सिद्धयर्थ ब्रह्मा कालावबोधकं ज्योतिशास्त्रं विनिर्माय नारदाय प्रोवाच। नारदश्च शास्त्रस्यास्य महत्त्वमत्रैकृत्य लोके प्रवर्तयामासेदम्। मतान्तरानुसारेणेदं शास्त्रं प्रथमं सूर्येण मयासुराय प्रोक्तम्। ततश्च जगति प्रवर्तितमिति। कश्यपसंहितानुसारेण ज्योतिः शास्त्रप्रवर्तका अष्टादश आचार्याः ते च यथा–

सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिः पराशरः।
कश्यपो नारदो गर्गो मरीचिर्मनुरत्रिराः।।
रोमशः पौलिशश्चैव च्यवनो यवनो भृगुः।
शौनकोऽष्टादशाश्चैते ज्योतिः शास्त्रप्रवर्तकाः।। इति।

पराशरस्तु तानित्थं गणयति–

विश्वसृङ् नारदो व्यासो वसिष्ठोऽत्रि पराशरः।
लोमशो यवनः सूर्यश्च्यवनः कश्यपो भृगुः।।
पुलस्त्यो मनुराचार्यः पौलिशः शौनकोऽत्रिराः।
गर्गो मरीचिरित्येते ज्ञेया ज्योतिः प्रवर्तकाः।। इति।

नारदस्वत्वथ तानित्थंमाह–

ब्रह्मचार्यो वसिष्ठोऽत्रिर्मनुः पौलस्त्यरोमशौ।
मरीचिरत्रिरा व्यासो नारदः शौनको भृगुः।।
च्यवनो यवनो गर्गः कश्यपश्च पराशरः।
अष्टदशैते गम्भीराः ज्योतिः शास्त्रप्रवर्तकाः।। इति।

इदञ्चाग्रे कथितम्–

यज्ञाध्ययनसौान्तिग्रहषोडशकर्मणाम्।
प्रयोजनञ्च विज्ञेयं तत्तत्कालविनिर्णयात्।।
विनैतदखिलं श्रौतं स्मार्तं कर्म न सिद्धयति।
तस्माज्जगद्धितायेदं ब्रह्मणा रचितं पुरा।।
तं विलोक्याथ तत्सूनुर्नारदो मुनिसत्तमः।
उक्त्वा स्कन्धद्वयं पूर्वं संहितास्कन्धमुत्तमम्।।
वक्ष्ये शुभाशुभफलज्ञप्त्ये देहधारिणाम्।
होरास्कन्धस्य शास्त्रस्य व्यवहारप्रसिद्धये।।

तदित्थं हि ब्रह्मणा प्रवर्तितं शास्त्रं हि ब्रह्मा नारदाय सोमः शौनकाय नारायणो वसिष्ठाय रामेशाय च वसिष्ठो माण्डव्यवामदेवाभ्यां व्यासः स्वशिष्याय सूर्यो मयाय पुलस्त्याचार्यगर्गात्रिरोमकाः स्वस्वशिष्येभ्यः पराशरो मैत्रेयाय च प्रोक्तवन्त इति। बृहत्संहितायामुक्तम्–

मुनिविरचितमिदमिति यच्चिरन्तनं साधु न मनुजग्रथितम्।
तुल्येऽर्थेऽक्षरभेदादमन्त्रके का विशेषोक्तिः।। इति।

व्याख्यातीदं भट्टोत्पलः मुनिभिर्ब्रह्मादिभिरिति। पुनस्तत्रैवोक्तम्–

आब्रह्मादिविनिः सृतमालोक्य ग्रन्थविस्तरं क्रमशः।
क्रियमाणकमेवैतत् समासतोऽतो ममोत्साहः।। इति।

यथाऽऽह गर्गाचार्योऽपि–

स्वयं स्वयम्भुवा सृष्टं चक्षुर्भूतं द्विजन्मनाम्।
वेदाङ्गं ज्योतिषं ब्रह्मपरं यज्ञहितावहम्।
मया स्वयम्भुवः प्राप्तं क्रियाकालप्रसाधनम्।। इति।
अनेन ज्ञायते यद्धि स्वनिर्मित्तं शास्त्रमिदं ब्रह्मा नारदगर्गप्रभृतीनृषीन् प्रोवाचेति।

निष्कर्षेतेषामेतदेव यचछास्त्रमिदं प्रथमं ब्रह्मणा यज्ञप्रवर्तनाय सृष्टम्। तच्च शिष्यपरम्परा बुधैर्गृहीतम्। तदेव आर्यभटेन प्रकाशितं वराहमिहिरेण विवेचितञ्च। तेनैव वराहमिहिरः कथयति–

प्रथममुनिकथितमवितथमवलोक्य ग्रन्थविस्तरस्यार्थम्।
नातिलघुविपुलरचनाभिरुद्यतः स्पष्टमभिधातुम्।। इति।
प्राग्वैदिकवैदिककाले ज्योतिषस्य स्वरूपम्

प्राग्वैदिककालो हि वेदमन्त्रसत्रदपि प्राचीनतरः कालः। न स ह्यस्माकं ज्ञानविषयः। तदा ज्योतिषशास्त्रस्य तु का वार्ताऽपितु तद्योनेर्वेदस्यैव किं स्वरूपमासीदित्यपि अनुमातुं वयं नैव प्रभवामः एतावदेव तद्विषये वक्तुं पार्यते यत्तदापि ज्योतिषविषये स्वल्पमपि ज्ञानमवश्यमेवाऽऽसीघस्य यथायथं वा विकसितं रूपं वेदमन्त्रेषु दृश्यते। 'अग्निः पूर्वेभिः ऋषिभिरीड्यो नूतनैरिह' 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः' 'इति शुश्रूम धीराणां ये नस्तद्वयाचचक्षिरे' इत्यादिकथनैरेतत्सिध्यति। सम्प्रत्यपि ग्रामीणजना दिगवबोधाय ध्रुवादिनक्षत्राणां समयज्ञानाय रात्रौ कृत्तिकानां साहाय्यं गृह्णन्ति। दिवा तु ते सूर्यगतिमधीत्य समयज्ञानं कुर्वन्ति सुदिने। सम्भवत्येतदज्ञातयुगस्यैवावशिष्टम्। ऋग्वेदे 'देवानां पूर्वे युगेऽसतः सदजायत। देवानां युगे प्रथमेऽसतः सदजायत' इति यत्कथितं यच्च 'यः पश्यादुत्तरे युगे' इत्यप्युक्तं तस्यायमेवाशयो भवितमर्हति यद्वैदिकसंहितापूर्ववर्तिकालेऽपि काचन विशिष्टा सभ्यताऽऽसीदिति।
वेदा हि नैव निश्चयेन ज्योतिषशास्त्रमात्रमुद्दिश्य प्रवृत्ताः। तेन तत्र नैतादृशः प्रसत्रे येन ज्योतिषशास्त्रं व्याख्यातं स्यात्। तथापि इतर विषयप्रसत्रवशाज्ज्योतिषविषयेऽपि यत्किञ्चिदुक्तं तेनैतज्ज्ञायते यतदाऽपि शास्त्रेऽस्मिन् मानवींय ज्ञानं समृद्धमासीत्। तत्र तत्र गगनमण्डलं सूर्याचन्द्रमसौ नक्षत्राणि ताराः ऋतून् मासान् दिवसाँश्चादाय मनोहरि चमत्कारि वर्णनं समुपलभ्यते। प्रकरणेऽस्मिन् वेदशब्देन कात्यायनप्रतिज्ञासूत्र–मनुसृत्य तस्य संहिता–ब्राह्मणभागौ गृहीतौ, मन्त्रब्राह्मणयोर्वेदनामधेयमित्युक्तेः। आकाशमधिकृत्य तत्रोक्तं यद्यः स आकाशः स आदित्य एव। एतस्मिन्नुदिते सर्वमिदमाकाशते। इन्द्र एव स इति। तेन हि आकाशते द्योतते। इतयाकाशः। तत्र पृथिव्या उपरिष्टादन्तरिक्षस्य तदुपरिष्टाद् दिवः प्रतिष्ठा वर्णिता। दिवि मेघस्यान्तरिक्षे वायोश्च स्थितिरपि वर्णिता दृश्यते। यथा–

'नमोस्तु रुद्रेभ्यो ये दिवि वर्षमिषवः[1]।'
'नमोस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवः[2]।'
एवमेव द्यावापृथिवीविषये तत्रोक्तम्–
'यदा वै द्यावापृथिवी संज्ञानाथेऽथ वर्षति[3]।'
'प्राणोदानौ वै द्यावापृथिवी[4]।'

'इमौ वै लोकौ रेतः सिञ्चाविमौ ह्योव लोकौ रेतः सिञ्चत इतो वा अयमूर्ध्वं रेतः सिञ्चति धूमं साऽमुत्र दृष्टिर्भवति तामसावभुतौ वृष्टिं तदिमा अन्तरेण प्रजायन्ते[5]।'
ऋग्वेदेऽप्युक्तम्–

'तिस्त्रो द्यावः सवितुद्र्वा उपस्था एका यमस्य भुवने विराषाट्।
आणि न रथ्यममृताभितस्थुः[6]।'

विराजमधिकृत्य तत्रोक्तम्–

नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकानकल्पयन्[7]।।
चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत[8]।।

ऐतरेयब्राह्मणे उक्तम्–

'द्यौरन्तरिक्षे प्रतिष्ठिताऽन्तरिक्षं पृथिव्याम्[9]।'
एवमेव तत्र तत्र संवत्सरमासर्तुपाहोरात्रसूर्यचन्द्रादिविषयेऽपि सुनिपुणं वर्णितं दृश्यते। तत्र तत्र युगादिविषये च चर्चा लभ्यते। यथा हि–
'देवानां पूर्वे युगे सतः सदजायत[10]।'
'तदूचुषे मानुषेमा युगानि[11]।'
'विश्वे ये मानुषा युगा यान्ति मर्त्यं रिषः[12]।'
'पर्यन्या नाहुषा युगा[13]।'
'दीर्घतमा मामतेयो जुजुवनि दशमे युगे[14]।'
'युगे युगे विदध्यम्[15]।'
'या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा[16]।'
'मानुषा युगाः[17]।'

मन्त्रभागेष्वेतेषु युगशब्दः कालविशेषवाचकत्वेन प्रयुक्ता दृश्यते। देवयुगमानुषयुगयोरन्तरमपि तत्र निर्दिष्टं लभ्यते। 'पूर्वे युगे' 'उत्तरे युगे' इत्यादि कथने युगशब्देन निश्चितकालमान एव निर्दिष्टोऽस्ति। यत्र कुत्र युगशब्दः कल्पार्थेऽपि प्रयुक्त इव प्रतिभाति। 'त्रियुगं पुरा' इत्यत्र युगशब्दः सत्यत्रेताद्वापरावबोधक एव। वैदिकमन्त्रेषु यत्र यत्र युगभेदत्वेन कृतादिशब्दानामपि प्रयोगो दृश्यते। यथा वाजसनेयीयसंहितायाम्–

'अक्षराजाय कितवं कृतायादिनवदर्शं त्रेतायै कल्पिनं द्वापरायाधिकल्पिनं....[18]।'
एवमेव तैत्तिरीयसंहितायां युगमानत्वेन कृतत्रेताद्वापरशब्दानां प्रयोगो दृश्यते।
तैत्तिरीयब्राह्मणेऽयुक्तम्– 'कृताय सभाविनं त्रेताया आदिनवदर्शं द्वापराय बर्हिः सदं फलये सभास्थागुण[19]।'
तथैव ऐतरेयब्राह्मणेऽपि यथा–
'कलिः शयानो भवति सञ्जिहानस्तु द्वापरः।
उत्तिष्ठंस्त्रेता भवति कृतं सम्पद्यते चरन्।।
चरैवेति चरैवेति[20]।'
पुनश्च तैत्तिरीयब्राह्मणे– 'ये वै चत्वारः स्तोमाः कृतं तत्। अथ ये पञ्च कलिः सः। तस्माच्चतुष्टोमः[21]।'

ऋग्वेदादौ युगावयवत्वेन संवत्सरादयोऽप्युल्लिखिताः। यथोक्तं वेदाङ्ग्ज्योतिषे पाञ्चसंवत्सरं युगमिति तस्य बीजं वेदेषु दृश्यते। यथा हि–
संवत्सरस्य तदहः परिष्ठ यन्मण्डूकाः प्रावृषीणं बभूव।
ब्राह्मणासः सोमिनो वाचमक्रत ब्रह्म कृण्वन्तः परिवत्सरीणम्[22]।।
तथैव वाजसनेयसंहितायाम्–

'....संवत्सराय पर्यायिणीं परिवत्सरायाविजातामिदावत्सरायाती– त्वरीमिद्वत्सरायातिश्कद्वरीं वत्सराय विजर्जरीं संवत्सराय पलिक्रीम्.....[23]।'

एवमेव तैत्तिरीयब्राह्मणेऽप्युक्तम्–

'अग्निर्वा संवत्सरः आदित्यः परिवत्सरः चन्द्रमा इदावत्सरः वायुरनुवत्सरः[24]।'

'संवत्सराय पर्यायिणीं परिवत्सरायाविजातामिदावत्सरायापस्कद्वरीं इद्वत्सरोऽसिवत्सरोऽसि[25]।'

इत्थं हि माध्यन्दिनीये पञ्चानां तैत्तिरीये षण्णामन्यत्र चतुर्णामेव नामोल्लेखो दृश्यते।

कालवाचकत्वेन वर्षशब्दः शतपथब्राह्मणादौ प्रयुक्तो दृश्यते[26]। ऋग्वेदे हि ऋतुवाचकशरत्प्रभृतिशब्दा अपि वर्षवाचकत्वेन प्रयुक्ता दृश्यन्ते। गोपथब्राह्मणे[27] वषार्थे हायनशब्दः शुक्लयजुर्वेद समशब्दः प्रयुक्ता दृश्यते।

**सन्दर्भ ग्रंथ सूची :**


1. यजुः0 16। 64।
2. यजुः0 16। 65 ।
3. शत0ब्रा0 1।8।3।12।
4. शत0 14।2।2।36
5. शत0 7।4।2।22।
6. शत0 1।35।6।
7. ऋ0 10।90।14।
8. ऋ0 10।90।13।
9. ऋ0 10।72।2।
10. ऋ0 11।6।
11. ऋ0 10।72।2।
12. ऋ0 1।10।3।4।
13. ऋ0 5।52।4।
14. ऋ0 5।52।4।
15. ऋ0 5।73।3।
16. ऋ0 1।158।6।
17. ऋ0 19।97।1।
18. वा0 12।71।1।
19. वा0 30।18।
20. वा0 4।3।3।
21. वा0 3।4।1।
22. वा0 33।15।
23. वा0 1।5।11।
24. ऋ0 7।10।3।7।
25. ऋ0 30।15।
26. ऋ0 1।4।10।
27. ऋ0 3।10।4।